# श्री सुरसरस्वती सभा शृङ्गेरि

## तुरीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः – २९-०१-२०१२ | अङ्काः–१००

पूर्वाह्णे - १०-०० तः १-०० पर्यन्तम् | समयः–घण्टात्रयम्

**1 पञ्चानाम् एकवाक्येनोत्तरं लिखत ।** 5

१. कस्य जन्म धिक्काराऱ्हः ?
२. हिमालयः कुत्र अस्ति ?
३. महीपतिः कं उपसान्त्वयितुं प्रचक्रमे ?
४. यक्षः कुत्र वसतिं चक्रे ?
५. स्वप्नवृत्तान्तं कः कस्मै अकथयत् ?
६. कः बकासुरं जघान ?
७. सुधाकरकरान् भुङ्क्त्वा के क्षीयन्ते ?
८. मध्यमव्यायोगस्य कर्ता कः ?

**2 पञ्चानां द्वित्रैः वाक्यैरुत्तरं लिखत ।** 10

१. विद्या किं किं साधयति ?
२. उमायाः जन्मदिनं कथं बभूव ?
३. कीदृशं नृपं प्रजाः प्रणमन्ति ?
४. यक्षः किं कृत्वा मेघाय स्वागतं व्याजहार ?
५. वामदेवः राजहंसं किमुवाच ?
६. भीष्मं जेतुं तेनैव उक्तः उपायः कः ?
७. धर्मराजस्य दृष्ट्या बान्धवाः के ?
८. राजा बकाय किं प्रतिश्रुतवान् ?

**3 द्वयोः पञ्चषैर्वाक्यैरुत्तरं लिखत ।** 8

१. भीमः घटोत्कचं कथं वर्णयति ।



पश्चादनुवर्तते

२. कृष्णं प्रति कर्णस्य उत्तरं किम् ?

३. शमनलोके मातङ्गः किं किं अपश्यत् ?

४. वृक्षराजं कविः कथं वर्णयति ?

**4 वाक्यत्रयं सप्रसङ्गं विवृणुत ।** 9

१. पूज्यतमाः खलु ब्राह्मणाः ।

२. विपदन्ताः ह्यविनीतसम्पदः ।

३. विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः ।

४. भोः चक्रिन् ! पूरय मे प्रतिज्ञाम् ।

५ सचिव ! नैष अमुष्य मृत्युसमयः ।

**5 द्वयोः भावं विशदयत ।** 8

१. धूमज्योतिस्सलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व नु पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ।।

२. अभिमानवतो मनस्विनः
प्रियमुच्चैः पदमारुरुक्षतः ।
विनिपातनिवर्तनक्षमं
मतमालम्बनमात्मपौरुषम् ।।

३. अयाचितारं न हि देवदेव
मद्रिः सुतां ग्राहयितुं शशाक ।
अभ्यर्थनाभङ्गभयेन साधु
र्माध्यस्थमिष्टेऽप्यवलम्बतेऽर्थे ।।

**6 श्लोकद्वयं पूर्णं लिखत ।** 6

१) प्रथमवयसि .......................................... विस्मरन्ति ।।

२) शक्यो ................................................ औषधम् ।।

३) प्रदानं ............................................... व्रतमिदम् ।।

7 एकस्य कवेः देशकालग्रन्थानधिकृत्य लिखत । 4

१) दण्डी २) रङ्गनाथशर्मा

8 एकस्य लघुटिप्पणीं लिखत । 4

१) भीष्मः २) राजवाहनः

9 चत्वारि पदानि वाक्ये योजयत । 4

१) सम्प्रति २) विप्रकुर्युः ३) मन्यसे
४) बहुधा ५) परिमुषिताः ६) अतिक्रामति

10 चतुर्णां रूपाणि विवेचयत । 4

१) धनिनः २) देहधारिभिः ३) महिमा
४) हविषा ५) मघोनः ६) अद्रौ

11 चतुर्णां पर्यायपदानि लिखत । 4

१) किल्बिषम् २) शमनः ३) वार्ष्णेयः
४) उद्यमः ५) अग्रजन्मा ६) इन्द्रः

12 चतुर्णां विग्रहवाक्यानि विलिख्य समासनाम लिखत । 4

१) पुरुषसिंहः २) कुमतिः ३) पूर्वापरौ
४) निशिताङ्कुशः ५) यथामति ६) पञ्चवटी

13 चतुर्णां सन्धिं विभज्य नाम लिखत । 4

१) खल्वेषः २) तावदेनम् ३) ह्येषः
४) अपरमिदं ५) ममैषः ६) मूर्खालापः

14 द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत । 6

१) कुर्यात् २) समर्थयते ३) ससर्ज
४) हन्ति ५) लभतां ६) चक्रे



पश्चादनुवर्तते

**15** **द्वयोः व्याकरणविशेषं लिखत ।** 4

१) अलं परिश्रमेण   २) पशुमारम्   ३) नगाधिराजः
४) वनमभितः

**16** **समासमेकं सलक्षणं विशदयत ।** 4

१) द्वन्द्वः   २) अव्ययीभावः

**17** **चतुर्थं पदं लिखत ।** 4

| | | | | | | |
|---|---|---|---|---|---|---|
| १) | भीष्मः | ; | तालध्वजः | – | वार्ष्णेयः | ............ । |
| २) | पीताम्बरः | ; | बहुव्रीहिः | – | पञ्चवटी | ............ । |
| ३) | दशरथस्य पुत्रः | ; | दाशरथिः | – | विराटस्य पुत्रः | ............ । |
| ४) | वसिष्ठः | ; | शक्तिः | – | गौतमः | ............ । |

**18** **रिक्तं स्थानं पूरयत ।** 4

१) प्रणमत ——— सूत्रधारं महान्तम् ।
२) स्वकर्म ——— हि लोकः ।
३) न खलु ——— रथो याति ।
४) ——— न क्रियाम् ।

**19** **प्रयोगपरिवर्तनं कुरुत । (द्वयोः)** 4

१) धर्मः नरं रक्षति ।
२) तेन क्रिया कृता ।
३) शशाङ्कः आकाशे राजते ।

* * * * *

# श्री सुरसरस्वती सभा शृङ्गेरि

## प्रवेशपरीक्षा

## द्वितीयपत्रिका

दिनाङ्कः – २९-०१-२०१२ | अङ्काः–५०
अपराह्णे – १-३० तः ३-०० पर्यन्तम् | समयः–सार्धैकहोरा

**1 द्वावुत्तरयत :-** 8

१. धातोः तव्यप्रत्ययः आनीयर्प्रत्ययश्च कस्मिन् अर्थे भवन्ति? वाक्यरूपैः त्रिभिरुदाहरणैः विशदीकुरुत ।
२. धातूनां कति गणाः ? तान् निर्दिश्य तेषां विकरणप्रत्ययानि लिखत ।
३. शतृ - शानच् प्रत्ययौ – उदाहरणपूर्वकं विवृणुत ।

**2 चतुर्णां वाक्यानां प्रयोगं व्यत्यस्यत :-** 4

१. बालिकाभिः गीतानि गीयन्ते ।
२. शल्यराज, मम रथं चोदय ।
२. विद्वांसः स्वदेशे परदेशे च पूज्यन्ते ।
४. अस्यां शालायां छात्रैः संस्कृतभाषा पठ्यते ।
५. त्वं वस्त्राणि क्रीणीहि ।
६. भक्तेन भगवान् वरान् याच्यते ।

**3 द्वावुत्तरयत :-** 8

१. अव्ययीभावसमासं सोदाहरणं विवृणुत ।
२. दीपकस्य लक्षणं सोदाहरणं विशदयत ।
३. शालिनीं – सलक्षणं सप्रस्तारं निरूपयत ।

**4 त्रयाणां तत्तल्लकारस्य सर्वाणि रूपाणि लिखत :-** 9

१. अत्ति २. हन्तु ३. दोग्धि ४. एधि ५. दुदोह

**5 त्रयाणामन्यलिङ्गरूपाणि लिखत :-** 3

१. श्रोता २. दृष्टवती ३. सहमाना ४. कुर्वाणः ५. देयः

**6 त्रयाणां विग्रहं विलिख्य समासनाम लिखत :-** 3

१. शाकपार्थिवः २. अनश्वः ३. गुरुदक्षिणा ४. राजपुरुषः ५. पञ्चगवम्

**7 मातृभाषया अनुवादं कुरुत । (पञ्चानामेव)** 5

१. भगवान् रसात्मकः सोमो भूत्वा सर्वाः औषधीः पुष्णाति ।
२. किं ते अभिष्टा प्रदद्याम् शीघ्रं ब्रूहि ।



पश्चादनुवर्तते

३. साधुवेषधारिभिः चोरैः बहवो धनिकाः धनानि अमुष्यन्त ।
४. संतप्तायसि संस्थितस्य पयसो नामापि न श्रूयते ।
५. हनूमान् मध्येसमुद्रं सहसा समुत्थितं पर्वतमेकमपश्यत् ।
६. दूरसंपर्कसाधनेषु दूरदर्शनमत्यन्तं प्रमुखमस्ति ।
७. छात्राः भक्त्या आचार्यं प्रणम्य ततः अध्ययने प्रवर्तन्ते ।

**8 पञ्चानां संस्कृतेन अनुवादं कुरुत :-** 5

1. ಶೂರರು ಉತ್ಸಾಹದಿಂದ ಯುದ್ಧಭೂಮಿಗೆ ಹೋದರು.
   Valiant men went to the battle field with enthusiasm.
2. ಕವಿಗಳು ಮಹಾತ್ಮರ ಕೀರ್ತಿಯನ್ನು ಎಲ್ಲ ದಿಕ್ಕುಗಳಲ್ಲೂ ಹರಡುತ್ತಾರೆ.
   Poets spread the fame of great men in all directions.
3. ನಾನು ಸಿಹಿಯಾದ ಹಣ್ಣುಗಳನ್ನು ತಿನ್ನಲು ಬಯಸುತ್ತೇನೆ.
   I wish to eat sweet fruits.
4. ಯಮುನಾನದಿಯ ತೀರದಲ್ಲಿ ಕೃಷ್ಣನು ವೇಣುಗಾನವನ್ನು ಮಾಡಿದನು.
   Krishna played flute on the banks of Yamuna river.
5. ಕಷ್ಟಬಂದರೂ ವಿವೇಕವನ್ನೂ ಧೈರ್ಯವನ್ನೂ ಜನರು ಬಿಡಬಾರದು.
   Even during adversity, people should not leave the power of discrimination and courrage.
6. ಕಳ್ಳರು ನಮ್ಮ ಬಾಳೆತೋಟದಲ್ಲಿ ಎಲ್ಲ ಬಾಳೆಗಿಡಗಳನ್ನು ಕತ್ತರಿಸಿದರು.
   The thieves have cut the Banana plants in our Banana garden.
7. ಮಾಲಿಕನು ತೋಟದಲ್ಲಿ ಸೇವಕರಿಂದ ಗಿಡಗಳನ್ನು ನೆಡಿಸಿದನು.
   The lord got the plants planted in the garden.

**9 संस्कृतेनानुवादं कुरुत :-** 5

ಧಾರಾನಗರದಲ್ಲಿ ಭೋಜನೆಂಬ ರಾಜನಿದ್ದನು. ಅವನ ಆಸ್ಥಾನದಲ್ಲಿಯ ಶ್ರೇಷ್ಠಕವಿಗಳಲ್ಲಿ ಕಾಳಿದಾಸನು ರಾಜನಿಗೆ ಅತ್ಯಂತ ಪ್ರಿಯನಾಗಿದ್ದನು. ಭೋಜರಾಜನು ತನ್ನ ಮರಣೋತ್ತರ ಶ್ಲೋಕವನ್ನು ರಚಿಸಲು ಕಾಳಿದಾಸನಿಗೆ ಹೇಳಿದನು. ಕುಪಿತನಾದ ಕಾಳಿದಾಸನು ಏಕಶಿಲಾ ಎಂಬ ಪಟ್ಟಣಕ್ಕೆ ಹೋದನು. ಭಿಕ್ಷುಕ ವೇಷವನ್ನು ಧರಿಸಿ ಕಾಳಿದಾಸನನ್ನು ಶೋಧಿಸಲು ಹೊರಟು ರಾಜನು ಏಕಶಿಲಾ ಪಟ್ಟಣದಲ್ಲಿ ಕಾಳಿದಾಸನನ್ನು ನೋಡಿದನು. ರಾಜನು ಸತ್ತುಹೋದನು ಎಂದು ಹೇಳಿದನು. ಆಗ ಕಾಳಿದಾಸನ ಮುಖದಿಂದ ಮರಣೋತ್ತರ ಶ್ಲೋಕವು ಸಹಜವಾಗಿ ಹೊರಬಿದ್ದಿತು. ಆಗ ಅರಸನು ತನ್ನ ನಿಜರೂಪವನ್ನು ತೋರಿದನು. ರಾಜನ ಇಚ್ಛೆ ಪೂರ್ತಿಯಾಯಿತು.

There lived a king by name Bhoja in Dhara city. Among the great poets in his royal court, Kalidasa was very dear to him. Bhoja asked Kalidasa to write an obituary verse on him. Enraged Kalidasa went away to the city Ekasila. Wearing the dress of a begger, king went in search of Kalidasa and saw Kalidasa in the city Ekasila. He said that the king had expired. Then spontaneously an obituary verse came out from the mouth of Kalidasa. Then the king appeared in his natural form and his desire was fulfilled.